# भीष्म स्तुति

(श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां
प्रथम स्कन्धे युधिष्ठिरराज्यप्रलम्भः नाम नवमोऽध्यायः ॥)
श्री भीष्म उवाच -
इति मतिरुपकल्पिता वितृष्णा भगवति सात्वत पुङ्गवे
विभूम्नि ।
स्वसुखमुपगते क्वचिद्विहर्तुं प्रकृतिमुपेयुषि यद्भवप्रवाहः ॥
३२॥

त्रिभुवनकमनं तमालवर्णं रविकरगौरवराम्बरं दधाने ।
वपुरलककुलावृताननाब्जं विजयसखे रतिरस्तु मेऽनवद्या ॥
३३॥

युधि तुरगरजोविधूम्रविष्वक्कचलुलितश्रमवार्यलंकृतास्ये ।
मम निशितशरैर्विभिद्यमानत्वचि विलसत्कवचेऽस्तु कृष्ण
आत्मा ॥ ३४॥

सपदि सखिवचो निशम्य मध्ये निजपरयोर्बलयो रथं निवेश्य
।
स्थितवति परसैनिकायुरक्ष्णा हृतवति पार्थ सखे रतिर्ममास्तु
॥ ३५॥

व्यवहित पृथनामुखं निरीक्ष्य स्वजनवधाद्विमुखस्य
दोषबुद्ध्या।
कुमतिमहरदात्मविद्यया यश्चरणरतिः परमस्य तस्य मेऽस्तु ॥
३६॥

स्वनिगममपहाय मत्प्रतिज्ञा मृतमधिकर्तुमवप्लुतो रथस्थः ।
धृतरथचरणोऽभ्ययाच्चलद्गुः हरिरिव हन्तुमिभं गतोत्तरीयः ॥
३७॥

शितविशिखहतोविशीर्णदंशः क्षतजपरिप्लुत आततायिनो मे
।
प्रसभमभिससार मद्वधार्थं स भवतु मे भगवान् गतिर्मुकुन्दः
॥ ३८॥

विजयरथकुटुम्ब आत्ततोत्रे धृतहयरश्मिनि तच्छ्रियेक्षणीये।
भगवति रतिरस्तु मे मुमूर्षोः यमिह निरीक्ष्य हताः गताः
सरूपम् ॥ ३९॥

eAstroHelp

ललित गति विलास वल्गुहास प्रणय निरीक्षण
कल्पितोरुमानाः ।
कृतमनुकृतवत्य उन्मदान्धाः प्रकृतिमगन् किल यस्य
गोपवध्वः ॥ ४०॥

मुनिगणनृपवर्यसंकुलेऽन्तः सदसि युधिष्ठिरराजसूय एषाम् ।
अर्हणमुपपेद ईक्षणीयो मम दृशि गोचर एष आविरात्मा ॥
४१॥

तमिममहमजं शरीरभाजां हृदिहृदि
धिष्टितमात्मकल्पितानाम् ।
प्रतिदृशमिव नैकधाऽर्कमेकं समधिगतोऽस्मि विधूतभेदमोहः
॥ ४२॥

कृष्ण एवं भगवति मनोवाग्दृष्टिवृत्तिभिः ।
आत्मन्यात्मानमावेश्य सोऽन्तः श्वासमुपारमत् ॥ ४३॥
॥ इति॥

eAstroHelp